# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – -२०२१

| | | |
|---|---|---|
| कक्षा – आचार्य-२ | प्रश्नपत्रम् – ३ | गुणाः – ५० |
| विषयः – स्वामिनारायणवेदान्तः(S) | सत्रम् – ४ | समयः – १०:०० तः १२:०० |
| दिनाङ्कः – १५/०७/२०२१ | सन्दर्भग्रन्थः – स्वामिनारायणसिद्धान्तसुधा | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**

**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः प्रश्नयोः व्याख्यां कुरुत।**

१ माया त्रिगुणयुक्ता स्याद् ब्रह्मपरात्मशासित।
परिणामती नित्या विस्मयकारिणी जडा।।

२ सर्वोप्यौपाधिकः कालः समयाऽर्थो दिनादिकः।
वस्तुक्रियाद्यपेक्षः स जनेच्छापरिकल्पितः।।

३ अनादृत्य परात्मानमादृत्य कर्म मूर्तिमत्।
भवसम्भवमोक्षादावनर्हा आर्हताः सदा।।

४ शुद्धं सत्त्वं रजो नास्ति तमो नास्ति तथैव च।
संमिश्रिताः सदैवेते तस्मात् सर्वे प्रबन्धकाः।।

**प्रश्नः २ अक्षरपुरुषोत्तमदर्शनानुसारिणी सृष्टिप्रक्रिया।**

**प्रश्नः ३ स्वामिनारायणसिद्धान्तसुधादिशा कालनिरूपणम्।**

**प्रश्नः ४ जीवस्य ज्ञानस्वरूपत्वं ज्ञातृत्वञ्च विवेचय।**

**प्रश्नः ५ अवतारसिद्धान्तं यथावादग्रन्थं समीक्षय।**

**प्रश्नः ६ अधोलिखितेषु द्वयोः प्रश्नयोः व्याख्यां कुरुत।**

१ दयार्णवः कृपासाध्यः प्रसादात् सुलभा कृपा।
ब्रह्मभावात् प्रसीदेच्च ह्यक्षरपुरुषोत्तमः।।

२ धर्मो ज्ञानं च वैराग्यं भक्तिश्चैतैस्त्रिभिर्युता।
ज्ञेय एकान्तिको धर्मः प्रभुप्रसादसाधनम्।।

३ ब्रह्मरूपात्मरूपाद्या आत्मनिष्ठादयस्तथा।
उपदेशे प्रयुक्ता ये पर्यायाः पारिभाषिकाः।।

४ परमैकान्तिको भक्तः साधुः सत्पुरुषश्च सन्
एकान्तिको गुरुः साक्षाद् महापुरुष आदिभिः।।

**प्रश्नः ७ स्वामिनारायणदर्शनदिशा भक्तिनिरूपणम्।**

**प्रश्नः ८ परब्रह्मप्राप्तौ साधनराजः ब्रह्मभाव इत्यस्य विवेचनं कुरुत।**

**प्रश्नः ९ जीवन्मुक्तिनिरूपणं कुरुत।**

**प्रश्नः१० स्वामिनारायणसिद्धान्तानुसारं मुक्तसामर्थ्यं समीक्षय।**

**प्रश्नः११ केषाञ्चन दशानामतिलघूत्तराणि देयानि।**

१ माया एव स्वभावः प्रकृतिः इति कुत्रोपदिष्टा स्वामिनारायणेन?

२ 'येनाक्षरं पुरुषं वेद सत्यं प्रोवाच' कस्मिन् ग्रन्थे मन्त्रोऽयम्?

३ राजसाहंकारात् किमुत्पद्यते?

४ केन सह आत्मबुद्धिः कर्तव्या?

५ रसतन्मात्रजन्यजलादुत्पत्तिः कस्य?

६ परमाणुकारणवादिनः के?

७ बौद्धाः कतिधा?

८ 'एष हि द्रष्टा स्प्रष्टा श्रोतो ध्राता रसयिता मन्ता बोद्धा कर्ता' इति कस्यानुपनिषदि?

९ 'स्थूलं सूक्ष्मं कारणं चेति त्रयं जीवस्य माया' कस्मिन् वचनामृते वचनमिदम्?

१० 'मोघाशा मोधकर्माणो मोघज्ञाना विचेतसः' कस्मिन् ग्रन्थे पङ्क्तिरियम्?

११ सगुणब्रह्म इति नाम्ना को विज्ञायते?

१२ वसुदेवात्मजः कृष्णो जीवो वा ईश्वरः?

१३ प्रमादश्च मोहश्च माया इति कुत्रोपदिष्टा स्वामिनारायणेन?

१४ स्वामिनारायणसिद्धान्तासुधाकारः कः?

१५ 'भवतो ब्रह्मरूपान् कर्तुं खलु ममावतारः' कस्य परावाणीयम्?

***